**अग्निकुम्भशिरस्क** ( agnikumbhaśiras-ka ) *adj.* having a pot with burning fire on the head रात्रौ च वित्रासयेत् । अग्निकुम्भशिरस्कैः शिवावद्रुतानि कुर्वद्भिर्मनुष्यैः ManuBh. ii. 59. 3 (*on* 7. 196)

**अग्निकूट** ( agni-kūṭa ) *m.* name of one of the many hells flowing with liquid fire अग्निकूटो महाप्लावो···नरकः SkandP. vi. 226. 62.

**अग्निकृत्** ( agni-kṛt ) *adj.* **A** productive of digestive fire, promoting digestion, stomachic कटुपाकोऽग्निकृत्पथ्यः संनिपातेऽनिलावरे ( शशः ) AṣṭāSam. i. 34. 16 (1. 7); i. 43. 24 (1. 7); i. 90. 2 (1. 16); सुनिषण्णोऽग्निकृद्‌वृष्यः AṣṭāHr. i. 6. 71; i. 10. 12; i. 15. 16; सौवीरमम्लम् ··· अन्तर्विदाह्यग्निकृत् KalyāKā. 5. 34; ( त्रिजातकं चतुर्जातकं च ) लघु पित्ताग्निकृद्‌रूक्षं कफवातविषापहम् BhāvPra. (Bhā.) 6(3). 73; 6(7). 77; अगस्तिफलमग्निकृत् BhojanKu. 74. 11; 111. 1; 114. 5; **B** causing burning sensatian, acrid तद्वच्चेद्यहयनत्रजं तदपरं विष्टम्भि गुर्वग्निकृत् ।···पानीयमिक्षूद्भवम् ।···अग्निकृत् विदाहि BhojanKu. 157. 15; 157. 18; **C** producing fire यन्त्राघाताग्निकृद्‌द्रावचूर्णधृक्कर्णमूलकम् । ··· लघुनालिकमप्येतत् प्रधार्यं पत्तिसादिभिः S'ukraNī. 4(7). 196; *m.* name of one of the chiefs of the hosts of S'iva दक्षयज्ञं ययौ प्रति । अग्निकृच्छतकोट्या च S'ivaP. ii(2). 33. 25 (110B. 3)

**अग्निकृत** ( agni-kṛta ) *adj.* **i** brought about or effected by the god of fire पूर्वं दैत्यभयं श्रुत्वा मारुताग्निकृतं महत् । कालनेमीति विख्यातो दानवः प्रत्यदृश्यत MatsyaP. 176. 48; रवीन्द्वोः किरणाः···। इन्द्रयमवरुणनिर्ऋतिश्वसनेशपितामहाग्निकृताः BṛSam. 34. 2; अग्निकृतदेवतावहनस्याधुनाप्यसिद्धत्वाभिप्रायेण मन्त्रलिङ्गोपपत्तेः BhāṭṭCan. 109. 4 (*on* xvi. 2. 6); **ii** effected or produced by fire अग्निकृतं नाम धूमाकुलनेत्राङ्गसंकोचनविधूननातिक्रान्तापक्रान्तादिभिः NāṭyaS'ā. 7. 94 (8); काष्ठेऽग्निकृतः स्वभावो विनाशो न सर्व इति चेत् PramāVāSvopVṛ. 95. 19; **iii** heated on fire, kept on fire यामाष्टकेनाग्निकृतेन दोलया पश्चाद्रसेनाभिविमर्दितोऽसौ RasPraSu. 3. 61.

**अग्निकृत्य** ( agni-kṛtya ) *n.* cauterization (a treatment in medicine) शस्त्रकर्माग्निकृत्येषु क्षारमप्यवचारयेत् CaraS. vi. 25.107 (1941 Ed.)

**अग्निकेतन** ( agni-ketana ) *m.* name of one of the 70 tutelary deities of S'aṅkara-Nārāyaṇa अग्निजिह्वो हुताशश्चाप्यग्निरूपोऽग्निकेतनः । ··· इत्याग्नेय्यां दिशि सप्ततिः ĪśānS'iPa. ii. 54. 94.

**अग्निकेतन** ( agni-ketana ) *n.* **i** smoke धूमोऽम्भःसूवायुवाहौ करमालोऽग्निकेतनम् ParaNā. 874; **ii** a receptacle for fire कुण्डं देवजलाधारे मानमेदेऽग्निकेतने S'abdaRaSaK. 96. 8.

**अग्निकेतु** ( agní-ketu ) *adj.* having fire as an emblem or characteristic mark शुक्रपेशा नभसा ज्योतिषागाद् विश्वरूपा शबलीरग्निकेतुः TaiS. IV. iii. 11. 5 ( Sāy. अग्निहोत्रिभिरुषःकाले विहृत्य प्रज्वालिता येऽग्नयस्ते केतवो ध्वजस्थानीया यस्याः सा अग्निकेतुः ); KāṭhS. 39. 10; ओं नमस्ते देवेशाय···अग्निकेतवे S'ivaP. ii(5). 49. 0 (280A. 1)

**अग्निकेतु** (agni-ketu) *m.* **i** name of a demon (belonging to Rāvaṇa's army, killed by Rāma) अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः Rāmā. vi. 9. 2; vi. 33. 11; vi. 1686* (5); vii 33. 26; रेजे रथस्थोपरि रश्मिकेतुरदीपयत्तं पुनरग्निकेतुः RāmC. 27. 22; 28. 71; अग्निकेतुर्बलोदग्रः सुमन्त्रो रश्मिकेतनः । यज्ञकोपश्च काकुत्स्थमदृश्यं चक्रिरे शरैः RāmāMañ. 323. 25; भग्नं द्रागग्निकेतोरपि धरणिगतं शीर्षमाकार्षि कङ्कैः RāmBāSta. 72; Rāgh. 17. 54; **ii** name of a god अग्निकेतुरिति ख्यातः क्रूरो ज्योतिःसुरोऽभवत् PadmP.(Ra.) 39. 147; **iii** name of a man पुरोहितस्य सोमस्य प्रियायास्तनयद्वयम् । सुकेतुरग्निकेतुश्च PadmP.(Ra.) 41. 116; **iv** name of one of the chief attendants of S'iva मुखरन्ध्रभागात् । ···अग्निकेतोर्निरीयुरथ हुंकृतधूमदण्डाः HarVi. 7. 59; **v** one of the names of Brahmā अग्निमुखो ह्यग्निकेतुर्मुनिरूपो दिशां पतिः । ... एवं स्तुतस्तु रामेण ब्रह्मा PadmP. v. 35. 174; **vi** name of one of the two door-keepers of Skanda गोपुरद्वार्यग्निकेतुं सूर्यकेतुं च पूजयेत् ĪśānS'iPa. ii. 53. 72; सदसि पुनरग्निकेतुर्द्वाःस्थौ स्तः सूर्यकेतुश्च TantrSa. 9. 28; **vii** name of a comet अथाग्निकेतोरुदयः AdbhuSāg. 189. 6; **viii** smoke [ APTE ]

**अग्निकेश** ( agni-keśa ) *adj.* with fiery hair प्रतस्थिरे राक्षसवीरपुत्राः । शतं विकेशाः शतमग्निकेशाः RāmC. 32. 79; *m.* **i** name of the author of an ancient astronomical text विश्वामित्रो गुडाग्निकेशौ च Sārā. 54. 11; **ii** name of one of the deities (invoked in Tantric texts) अनलाख्यमग्निकेशम् ··· पत्रेषु परितो यजेत् S'āraTi. 20. 36; ĪśānS'iPa. ii. 60. 31; i. 32. 55.

**अग्निकोटि** ( agni-koṭi ) *f.* crores of burning fires तां चाग्निकोटिसंकाशां मत्वैवं कुरु यत्क्षमम् VāmaP. 55. 39.

**अग्निकोण** ( agni-koṇa ) *m.* South-East direction, the square to the South-East (in a diagram or building) अग्निकोणे न्यसेदग्निम् SkandP. ii(9) 27. 70; ii(9) 27. 58; पितृरोगाग्निकोणेषु नन्दनं गृहमादिशेत् SamarāSū. 24. 10; इत्यग्निकोणाद्वायुकोणम् ··· हुत्वा ĪśānS'iPa. ii. 15. 3 (8); अग्निकोणे त्वर्घ्यपात्रम् PāraS. 6. 40; अग्निकोणे धर्माय TantrSā.(K.) 80. 18; 104. 9; ईशाग्निकोणौ तु त्रिकोणरेखामध्यपतिताविति तद्वासनमर्थायातम् LalitāSaBh. 128. 3 ( *on* 171 ); YaśasCam. i. 65. 10 (comm.); i. 173. 13 (comm.); S'āraTi. 4. 110.

**अग्निकोणक** ( agnikoṇa-ka ) *m.* the South-East square ( निवेदयेत् ) मांसं विदार्यं चाग्निकोणके PañcaRā.(Ha.) i. 9. 16; ईशानश्चैव पर्जन्यः अ(न्यश्चा)-ग्निः पूषाग्निकोणके MānaSā. 7. 45.

**अग्निकोणतस्** ( agnikoṇa-tas ) *adv.* beginning with the quarter presided over by the fire god (the South-East) दलाग्रेषु च संपूज्याः कार्याद्या अग्निकोणतः BṛBrahmaS. i. 10. 28.

**अग्निकोणभाग** ( agnikoṇa-bhāga ) *m.* region of the South-East तस्या ईशाग्निकोणभागेऽभिवर्धनेन कोणान्तरे द्वे निष्पाद्य SetuBa. 33. 16.

**अग्निकोणमुख** ( agnikoṇa-mukha ) *adj.* [*f.* –i] facing (i. e. flowing) towards the South-East direction तमेवानुगता शब्दं ययौ पर्वतनन्दिनी । अग्निकोणमुखी BṛDharmaP. i. 52. 35.

**अग्निकोणमुखतस्** ( agnikoṇamukha-tas ) *adv.* from the opening towards the South-East direction ततोऽग्निकोणमुखतो ययौ गंगा धरातले BṛDharmaP. i. 52. 13.

**अग्निकोणस्थ** ( agnikoṇa-stha ) *adj.* existing in the South-East अग्निकोणस्थषट्कोणे···द्वादशवर्णान्···विलिख्य ParaśuKS. 11. 3 (309. 12)

**अग्निकोणादिग** ( agnikoṇādi-ga ) *adj.* [*f.* –ā] going towards the South-East and other directions ( वीथ्यः ) अग्निकोणादिगाः पञ्च सामान्येनाशुभाः स्मृताः MānaSā. 447A. 33.

**अग्निकोणादितस्** ( agnikoṇādi-tas ) *adv.* beginning with the direction of the South-East व्योमबाह्ये त्वपीठानामग्निकोणादितो न्यसेत् PauṣkS. 23. 29; यातुधानपदं यावदग्निकोणादितो न्यसेत् । स्नपनं स्थूलपराख्यम् PāraS. 15. 286; 6. 175.

**अग्निकोणान्तम्** ( agnikoṇāntam ) *adv.* up to the South-East corner वायव्यादग्निकोणान्तं जुहुयात् MahNirvāT. 9. 41.

**अग्निकोप** ( agni-kopa ) *m.* fury of fire भृगुणा जितेऽग्निकोपः सस्याम्बुदयायिविध्वंसः BṛSam. 17. 17; 24. 23; अब्दे प्रवृत्ते प्रभवेऽग्निकोपः VasiS. 6. 29; 6. 45; 15. 8.

**अग्निकोष्ठ** ( agni-koṣṭha ) *n.* the South-East square प्रवालं चाग्निकोष्ठे तु महानीलं यमे तथा । ···न्यसेत् MānaSā. 70. 53; अग्निकोष्ठस्य तत्कोणे चुल्लीवद्बिन्दुकत्रिकम् । आलिखेत् Mānaso. iv. 7. 1040.

**अग्निकोष्ठक** ( agnikoṣṭha-ka ) *n.* the South-East square पूजां कुम्भे समाहृत्य प्राप्ते लग्नेऽग्निकोष्ठके । कुद्दालेनाभिषिक्तेन मध्वक्तेन तु खानयेत् AgniP. 92. 16.

**अग्निकौतुक** ( agni-kautuka ) *n.* an unusual phenomenon caused by fire [ pw. ]

**अग्निक्रम** ( agni-krama ) *m.* a kind of game with dice called a *nirjīva* type ( कलाः ) द्यूताश्रया विंशतिः । तत्र निर्जीवाः पञ्चदश । ··· अग्निक्रमः JayaMa. 31. 24 (*on* 1. 3) [ suggested *em.* अग्रिमक्रमः ]

**अग्निक्रिया** ( agni-kriyā ) *f.* **i** branding with fire (i. e. red-hot iron) क्रियमाणोपकारे तु मृते विप्रे न पातकम् । विपाके गोवृषाणां तु भेषजाग्निक्रियासु च YājñaSm. 3. 284; **ii** forging in fire लोहानामपि सर्वेषां हेतुरग्निक्रियाविधौ । क्षयः संस्क्रियमाणानां तेषां दृष्टोऽग्निसंगमात् NāraSm. 161. 10; **iii** tending of fire, fire-worship, offering an oblation into fire अग्निक्रियया च यावान्यमनियमसमूहो ब्रह्मचारिणः स सर्व उपलक्ष्यते ManuBh. i. 110. 22 (*on* 2. 67); अन्यथा देवपित्र्यग्निक्रियाव्रतजपादिभिः । गृहे या पुण्यनिष्पत्तिः साध्वनि भ्रमतः कुतः KathāSaSag. viii. 6. 225; iv. 1. 122; **iv** obsequies, funeral ceremonies [ APTE ]

**अग्निक्रियारत** ( agnikriyā-rata ) *adj.* taking interest or occupied in fire-worship तत्रासीत्स महीपालो बाल्येऽप्यग्निक्रियारतः KathāSaSāg. ix. 6. 40.

**अग्निक्रीडा** ( agni-krīḍā ) *f.* fire-works, illuminations [ MW; APTE ]

**अग्निक्वथन** (agni-kvathana) *n.* boiling on fire व्यापन्नस्य चाग्निक्वथनम् ···कर्तव्यम् SuśruS. i. 45. 12.

**अग्निक्षारनदी** ( agnikṣāra-nadī ) *f.* twin rivers or expanse of fire and alkali शारीरं मानसं दुःखं प्राप्नुवन्ति नराधमाः । कृमिभिर्भक्षणञ्चैव तप्ततैलोपसेच( ? व )नम् । अग्निक्षारनदीभ्यां तु प्राप्नुवन्ति न संशयः VarāP. 203. 66.

**अग्निक्षारयोग्या** ( agnikṣāra-yogyā ) *f.* practice of cauterization and putting saline substances उपदिशेत् ··· मृदुषु मांसखण्डेष्वग्निक्षारयोग्याम् SuśruS. i. 9. 4.

**अग्निक्षेत्र** ( agni-kṣetra ) *n.* a place reserved for the placing of the